# पाणिनीयव्याकरणे शब्दनिर्वचनप्रकारसमीक्षणम्

**नवराजपाण्डेयः**

*प्राध्यापकः, विश्वविद्यालयविद्यापीठम्*

navrajpandey048@gmail.com

**सारसङ्क्षेपः**

*प्रस्तुतेऽस्मिन्नालेखे शब्दनिर्वचनविधौ पाणिनीयव्याकरणं कीदृशं ? कानि च शब्दनिर्वचनस्य तत्त्वानि ? वर्णपदवाक्यानां निर्माणं कथम् ? इत्यादिजिज्ञासापरिपूर्त्यर्थं पुस्तकालयीयविधिमवलम्ब्य समुपलब्धसामग्रीणां समुचितप्रयोगपूर्वकं विश्लेषणात्मकाध्ययनस्य प्रयासो विहितो वर्तते । शब्दसाधुत्वनिर्वचनेन सूत्रात्मकविधिना विश्वस्मिन् विद्यमानानां व्याकरणानां मध्ये पाणिनीयव्याकरणे के के ? विषयाः प्रतिपादिता इति तथ्यं प्रस्तोतुं वर्णानामुच्चारणस्थानप्रयत्नादिविवेचनं सङ्क्षेपतः तिङन्तकृदन्ततद्धितान्तसमस्तपदनिर्वचनविधिः सन्धिप्रक्रियया शब्दनिर्वचनविधिस्तथा सविश्लेषणं कारकीयप्रक्रियया वाक्यनिर्माणप्रकारश्च प्रदर्शितो वर्तते । शब्दनिर्वचनप्रकारे पाणिनीयव्याकरणस्य विषयाः सङ्क्षेपतो निर्दिष्टा विद्यन्ते । अनेन निष्कर्षेण पाणिनीयव्याकरणस्य शब्दनिर्वचनविषयक–विश्लेषणकार्येऽध्येतृणां सौकर्यं भविष्यतीत्याशासे ।*

**विशेषशब्दावली:**

निर्वचनम्, पार्थक्यम्, आविर्भूय, सहस्रशः, एकपदीभवनम् ।

## विषयपरिचयः

संस्कृतभाषायाः शब्दानां निर्वचने तस्याः पूर्णतया बोधनाय प्राञ्जलरूपेण सुव्यवस्थापनाय च परब्रह्मणो द्वितीयरूपस्य शब्दब्रह्मणो वेदस्य मुखरूपेण विद्यमानं पाणिनीयं व्याकरणं सर्वतोभावेन सफलमस्ति । यद्यपि संस्कृतभाषाया बोधनाय इन्द्रचन्द्रादिपूर्वाचार्यैः बहवः प्रातिशाख्य–व्याकरणादिग्रन्था निर्मिताः सन्ति, तथापि ते शब्दसाधुत्व–सम्पादनकार्ये पूर्णतां न भजन्ते । भगवतो महेश्वराल्लब्धवर्णसमाम्नायस्य पाणिनीयव्याकरणस्योदयानन्तरं ते सर्वे तिरोहिता इव जाताः । पाणिनीयं व्याकरणं शब्दनिर्वचने अन्यशास्त्रेभ्यः पृथक् स्थानं भजते । अत एव पाणिनीयव्याकरणे शब्दनिर्वचनप्रकारस्य समीक्षणमस्याऽऽलेखस्य प्रयोजनमस्ति ।

## शोधसमस्या

शब्दनिर्वचनविधौ पाणिनीयं व्याकरणं कीदृशम् ? तत्प्रकारश्च कीदृशः ?

## शोधोद्देश्यम्

शब्दनिर्वचनविधौ पाणिनीयं व्याकरणं कीदृशमिति प्राज्ञिकीं समस्यां समाधातुं तत्प्रकाराणां विश्लेषणात्मकं समीक्षणमस्यालेखस्योद्देश्यमस्ति ।

## पूर्वकार्यविवरणं समीक्षणं च

शब्दानां निर्वचनाय पाणिनिपूर्ववर्तिभिरिन्द्रचन्द्रकाशकृत्स्नादिभिराचार्यैः स्वस्वमत्यनुसारं प्रातिशाख्यैन्द्रचान्द्रादिशब्दविषयकविविधग्रन्थाः विरचिताः । तद्व्याख्यातृभिश्च तेषां विशदतया विश्लेषणं विहितं दृश्यते । परं तेषु लौकिकवैदिकोभयविधशब्दानां निर्वचने पूर्णता न दृश्यते । पाणिनेरुदयानन्तरं ते सर्वे तिरोहिता इव जाताः । भगवतो महेश्वराद् वर्णसमाम्नायमधिगम्य पाणिनिस्तदाधारेणाष्टाध्यायीनामकं व्याकरणस्य सूत्रात्मकं ग्रन्थं रचयामास । पाणिनेरष्टाध्यायीग्रन्थेन सर्वविधशब्दानां पूर्णतया निर्वचनविधिद्वारा शब्दविषयकसकलसमस्याः समाहिताः । अर्वाचीनैराचार्यैरपि विहितग्रन्थेषु शब्दनिर्वचनविधौ विविधतया प्रतिपादितेऽप्यत्र पाणिनीयव्याकरणे शब्दनिर्वचनप्रकाराणां स्पष्टतया समीक्षणमावश्यकमासीत् । अत एव तदावश्यकपूरणाय पाणिनीयव्याकरणानुसारं शब्दनिर्वचनप्रकाराणां समीक्षणमत्र विहितं सान्दर्भिकं वर्तते ।

## सैद्धान्तिकः पर्याधारः

प्रस्तुतेऽस्मिन्ननुसन्धाने पाणिनीयव्याकरणद्वारा शब्दानां निर्वचनविधाववलम्बितानां तत्प्रकाराणां वर्णपदवाक्यादीनां विश्लेषणात्मकसिद्धान्तमाश्रित्यायं शोधो विहितः ।

## अध्ययनविधिः

विशेषतया पुस्तकालयीय–विधिमवलम्ब्य इदमध्ययनं विहितम् । अत्र शब्दनिर्वचनप्रकारसमीक्षणप्रक्रमे पाणिनीय–व्याकरणपरम्परायां प्रचलितग्रन्थाः अन्ये ग्रन्थाश्चाध्ययने प्रमुखसामग्रीत्वेन प्रयुक्ता विद्यन्ते । पाणिनीयव्याकरणशास्त्रस्य शब्दनिर्वचनप्रकारसमीक्षणे सहायकभूतग्रन्थानां विवेचनपूर्वकं निष्कर्षरूपेण च पाणिनीयव्याकरणस्य शब्दनिर्वचनप्रकाराः विश्लेषणविधिना संक्षेपेण प्रस्तूयन्ते ।

## अध्ययनस्य क्षेत्रं सीमाङ्कनञ्च

शब्दसाधुत्वसम्पादकस्य पाणिनीयव्याकरणस्य शब्दनिर्वचनप्रकारसमीक्षणप्रसंगे तत्परम्परायां प्रचलिताः शब्दसाधुत्वप्रतिपादकाः तद्व्याख्यानभूता दार्शनिकविषय–प्रतिपादकाः ग्रन्थाश्च अस्यानुसन्धानात्मकाऽऽलेखस्य मुख्यं क्षेत्रं सीमा च भविष्यन्ति ।

## विषयप्रवेशः

संस्कृतभाषा अद्यतनप्रयुज्यमानानामधिकतरभाषाणां जननी अस्ति । जगतीतले प्रथममुत्पन्नमीश्वरप्रदत्तं मानवीयमैश्वर्यं वेदा एव । तत्रत्या संस्कृतभाषा हि आधुनिके वैज्ञानिके युगे प्रयुज्यमानानां सर्वेषां भाषापरिवाराणां मूलं जननी वा वर्तते ।

ऐतिहासिकभाषापारम्पर्यस्य पर्यवेक्षणेन अनुभूयते यद् वक्तृवैविध्येन देशकालगतपार्थक्येन च भाषा परिवर्तिता भवति । अत एव वैदिकभाषातः लौकिकभाषा भिन्नरूपा इव दृश्यते । तत्रापि कालभेदात् वाल्मीकि–व्यासादिविहित–रामायण–महाभारत–पुराणादिग्रन्थानां भाषाशैली सूक्ष्मरूपेण भिन्ना इव वर्तते । ततोऽपि दार्शनिक–ग्रन्थानां श्रीमद्भागवतादिग्रन्थानां भाषा शैली च पृथक्त्वं भजते ।

संस्कृतवाङ्मयस्य ऋग्वेदकालिकी वैदिकी भाषा एव देश–काल–प्रयोगव्यवहारादीनां पार्थक्येन वेदोपनिषत्–पुराणादिग्रन्थेषु प्रयुज्यमाना पाणिनेः समयपर्यन्तमागच्छन्ती क्वचिद् भेदवतीव प्रतीयते । मानवीयवाग्व्यवहारेषु प्रवहन्त्या देवभाषाया अपभ्रंशरूपेण प्राकृत–पाली–मागधी–नेपाली हिन्दी–त्यादयो भाषा जाताः ।

अस्य ब्रह्माण्डस्य सृष्टि–स्थिति–संहारकार्य–व्यवस्थापनाय स्वाभिप्राय–बोधनाय च विश्वस्य विधाता प्रथममन्तर्बहिःप्रकाशिकां ज्योतिःस्वरूपां देवभाषां विनिर्ममे । यदि भाषात्मकं ज्योतिर्भगवता निर्मितं नाभविष्यत् तर्हि इदं जगत् अन्धकारमयमभविष्यत् । अत एव लोकव्यवहार–सञ्चालनाय परं ब्रह्म एव शब्दब्रह्मत्वेन विवर्तितमिति दार्शनिकानां विचारः संगच्छते ।

तथा चः–

*अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।*
*विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥ (भर्तृहरिः,१९८७ श्लो.१)*

वैदिकवाङ्मयस्य ज्ञापनाय वैदिककाले अनेके भाषाविद ऋषयो महर्षयश्च प्रातिशाख्यं नाम व्याकरणं निर्ममिरे । कतिचन मुनयो लौकिकभाषायाः बोधनाय तस्या यथावत् स्थिरीकरणाय च विविधानि लौकिकव्याकरणानि विनिर्ममिरे ।

भगवतो महेश्वरात् वर्णसमाम्नायमधिगम्य तदाधारेण संस्कृतभाषायाः संरक्षणाय पाणिनिरष्टाध्यायीनामकं सूत्रात्मकं व्याकरणग्रन्थं रचयामास । तद्व्यवस्थासुदृढीकरणाय कात्यायनो वार्तिकग्रन्थं रचयामास । महामुनिः पतञ्जलिश्च व्याकरणस्य उच्चतमं महाभाष्य–ग्रन्थमरीरचत् । एतत्त्रिमुनिकृत्यसमुदितं पाणिनीयं व्याकरणमन्यशास्त्रेभ्यः सर्वोत्कृष्टं स्थानं भजते । पाणिनीयं व्याकरणं वागनुशासनविषये वर्णव्यवस्थायां पदव्यवस्थायां वाक्य–विवेचनप्रसङ्गे च यादृशं सूक्ष्मविश्लेषणं विदधाति तथा अन्यभाषा–व्यवस्थापक–व्याकरणेषु सूक्ष्मेक्षिका न दृश्यते । अत एव विश्वस्य सर्वे भाषाविदः वैयाकरणाश्च पाणिनीय–वर्णव्यवस्थादि–सूक्ष्मेक्षिकाया अतिशयं प्रशंसां कुर्वन्तः प्रमाणत्वेन शिरोधार्यन्ते ।

पाणिनिकाले प्रचलिता यादृशी परिष्कृता लौकिकी संस्कृतभाषा आसीत् तां व्यवस्थाप्य वैज्ञानिकरूपेण परिष्कृत्य च अनन्तकालपर्यन्तं यथावद्रूपेण स्थापयितुं सूत्रात्मकशैल्या महामुनिः पाणिनिः नियमबद्धं व्यदधात् ।

संस्कृतवाङ्मये प्रसिद्धानि बहुविधशास्त्राणि च पाणिनीय–व्याकरणं शिरसि निधायैव रचितानि दृश्यन्ते । यतः संस्कृतवाङ्मयं पाणिनीय–व्याकरणस्य नियमबद्धं जातम् ।

शब्दसाधुत्वसम्पादक–व्याकरणकर्ता महामुनिः पाणिनिर्हिमालयनिकटे नेपालस्य अर्घाखाँची–मण्डलान्तर्गते पर्वतशिखरे सिद्धतपःस्थले भगवन्तं महेश्वरमाराध्य तपश्चकार । तत्पश्चात् स पर्वतः पाणिनितपोभूमि–नाम्ना प्रसिद्धो जातः । इदानीन्तना जनास्तस्याद्रेर्नाम तदपभ्रंशरूपेण पणेना इति नाम्ना व्यवहरन्ति । तत्र पर्वतशिखरे पाणिनिः सनकादीनां सन्निकटे स्थित्वा चिरकालं तपश्चकार। तेषां तपसा तुष्टो भगवान् शंकरस्तान् यथेष्टं वरं दातुं तत्राविर्बभूव । पाणिनिसहितान् सनाकादि–सिद्धानुद्धर्तुकामो भगवान् महेश्वरस्तेषामग्रे आविर्भूय डमरुं वादयन् ननर्त । ते च डमरुध्वनिमाकर्ण्य नयनान्युद्घाट्य भगवतो दर्शनं लेभिरे । भगवतो महेश्वरस्य डमरुध्वनेर्निःसृतं अइउण्, ऋलृक् इत्यादि चतुर्दश–शिवसूत्र–जालमालोड्य सनकादयो ब्रह्मविद्यामवापुः, पाणिनिस्तमेव वर्णसमाम्नायमवाप्य तमाधारीकृत्य प्रत्याहारात्मकं व्याकरणशास्त्रं रचयामास इति वयं शास्त्राध्ययनतो जानीमः । तथा चः–

*'येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।*
*कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ।' (पाणिनीयशिक्षा, श्लो.२७) ।*

अत्यन्तसूक्ष्मविचार–प्रधानस्य वर्णव्यवस्थाबद्धमूलस्य पाणिनीयव्याकरणस्य निर्माणकार्ये शिवसूत्राणि बीजरूपाणि बभूवुः । भगवत्प्रसादेन अलौकिकशक्त्या पाणिनिरभूतपूर्वं प्रत्याहारप्रधानं सूत्रात्मकं व्याकरणशास्त्रं

रचयामास । यमालोक्य सर्वेषां लौकिकजनानां मनीषा साश्चर्यचकिता जाता । वेदस्य त्रीण्यङ्गान्यस्मिन् व्याकरणे सम्मिलितानि सन्ति, निरुक्तं, शिक्षा, व्याकरणञ्चेति । निरुक्तं श्रोत्रमुच्यते (पा.शिक्षा.४१) । वर्णागम–वर्णविपर्ययादिरूप–निरुक्तस्याप्यत्र अन्तर्भावो वर्तते । अकुहविसर्जनीयाः कण्ठ्याः । लृतुलसा दन्त्याः । लृवर्णस्य दीर्घा न सन्ति । सन्ध्यक्षराणां ह्रस्वा न सन्ति इत्यादि शिक्षावचनानि पाणिनीय–व्याकरणे अन्तर्भूतत्वात् शिक्षाघ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् (पाणिनीय–शिक्षा.४२) इति वेदपुरुषस्य त्रीण्यङ्गानि पाणिनीयव्याकरणे निहितानि विद्यन्ते । वर्णानां कण्ठताल्वाद्युत्पत्तिस्थानं तेषामुच्चाधोमध्य–भागाद्यवयवेषूच्चरित–वर्णानामाभ्यन्तरबाह्यादि भेदपूर्वकविवेचनं पाणिनीयव्याकरणस्य विषयः, एतद्वैशिष्ट्यमन्यत्र न क्वापि दृश्यते । केवलं मानवानामेव वर्णोच्चारणध्वनेर्मीमांसा पाणिनीयव्याकरणे न विहिताऽपितु मानवेतराणां पशुपक्षीणामप्युच्चारणं ध्वनिगतं सौक्ष्म्यं पाणिनिना विविक्तम् । तथा हिः–

*एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते ।*
*त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रिकम् ।। (याज्ञवल्क्यः २०७०: ३०)*
*चाषस्तु वदते मात्रां द्विमात्रं त्वेव वायसः ।*
*शिखी रौति त्रिमात्रं तु नकुलस्त्वर्धमात्रकम् ।। (पाणिनिः १९८९:२३)*

सकलप्राणिनां व्यक्ता–व्यक्त–ध्वन्युच्चारणगत–सूक्ष्मतमध्वनिविदा अलौकिकदृष्टिमता पाणिनिना व्याकरणशास्त्रे ह्रस्व–दीर्घ–प्लुतादिस्वराणामुच्चारण–कालनिर्धारणं कुक्कुटरुतध्वनेर्विहितमिति सुप्रसिद्धम् । ऊकालोऽज्झ्रस्वदीर्घप्लुतः (पा. सू.१।२।२७) इति ।

## वर्णानां स्थानानि

शब्दसाधुत्व–सम्पादनप्रक्रमे पाणिनिना वर्णानामुच्चारण–स्थानविवेचनमित्थं विहिमस्तिः–

**कण्ठस्थानम्** (अकुहविसर्जनीयानां कण्ठः) अ, आ, क्, ख्, ग्, घ्, ङ्, ह्, अः एते वर्णाः कण्ठस्थानत उच्चार्यन्ते । अत एतेषां कण्ठस्थानं वर्तते ।

**तालुस्थानम्** (इचुयशानां तालु ) इ, ई, च्, छ्, ज्, झ्, ञ्, य्, श् एते वर्णाः तालुस्थानत उच्चार्यन्ते, अत एतेषां तालुस्थानं वर्तते ।

**मूर्धास्थानम्** (ऋटुरषाणां मूर्धा) ऋ, ट्, ठ्, ड्, ढ्, ण्, र्, ष् एते वर्णा मूर्धास्थानत उच्चार्यन्ते, अत एतेषां मूर्धास्थानं वर्तते ।

**दन्तस्थानम्** (लृतुलसानां दन्ताः) लृ, त्, थ्, द्, ध्, न्, ल्, स् एते वर्णा दन्तस्थानत उच्चार्यन्ते, अत एतेषां दन्तस्थानं वर्तते ।

**ओष्ठस्थानम्** (उपूपध्मानीयानामोष्ठौ) उ, ऊ, प्, फ्, ब्, भ्, म्, उपध्मानीयविसर्गः एते वर्णा ओष्ठस्थानत उच्चार्यन्ते, अत एतेषामोष्ठस्थानं वर्तते ।

**नासिकास्थानम्** (ञमङणनानां नासिका च) ञ्, म्, ङ्, ण्, न् एते वर्णाः मुखसहितनासिकया उच्चार्यन्ते, अत एतेषां स्वस्ववर्गीयस्थानेन सह नासिकास्थानं च भवति ।

**कण्ठतालुस्थानम्** (एदैतोः कण्ठतालु) ए, ऐ, एतौ संयुक्तौ वर्णौ कण्ठतालुस्थानयोः साहाय्येनोच्चार्येते, अत एतयोः कण्ठतालुस्थानं वर्तते ।

**कण्ठोष्ठस्थानम्** (ओदौतोः कण्ठोष्ठम्) ओ, औ एतौ संयुक्तौ वर्णौ कण्ठोष्ठस्थानयोः साहाय्येनोच्चार्येते, अत एतयोः कण्ठोष्ठस्थानं वर्तते ।

**दन्तोष्ठस्थानम्** (वकारस्य दन्तोष्ठम्) वकारस्योच्चारणं दन्तोष्ठयोः साहाøयेन भवति, अतोऽस्य दन्तोष्ठस्थानं वर्तते ।

**जिह्वामूलस्थानम्** (जिह्वामूलीयस्य जिह्वामूलम्) जिह्वामूलीयविसर्गस्योच्चारणं जिह्वामूलतो भवति, अतस्तस्य जिह्वामूलस्थानं वर्तते ।

**नासिकास्थानम्** (नासिकाऽनुस्वारस्य) अनुस्वारस्योच्चारणं नासिकातो भवति, अतस्तस्य नासिकास्थानं वर्तते । यो वर्णः यस्मात् शरीरावयवस्थानादुच्चार्यते तत्तस्यस्थानमिति विवेकः ।

## वर्णानां प्रयत्नाः

पाणिनीयव्याकरणानुसारं यो वर्णो येन प्रयत्नेनोच्चार्यते तस्य तादृश एव प्रयत्नो भवति । वर्णोच्चारणप्रयत्नविषये आभ्यन्तरबाह्यभेदेन द्विविधौ प्रयत्नौ भवतः ।

### आभ्यन्तरप्रयत्नाः (लघुसिद्धन्तकौमुद्यनुसारम्)

स्पृष्टः प्रयत्नः (स्पृष्टं प्रयत्नं स्पर्शानाम्, कादयो मावसानाः स्पर्शाः) क्, ख्, ग्, घ्, ङ्, च्, छ्, ज्, झ्, ञ्, ट्, ठ्, ड्, ढ्, ण्, त्, थ्, द्, ध्, न्, प्, फ्, ब्, भ्, म्, एषां वर्णानां स्पृष्टः प्रयत्नो भवति ।

**ईषत्पृष्टः** प्रयत्नः (ईषत्पृष्टमन्तः स्थानाम्, यणोऽन्तस्थाः) य् व्, र्, ल्, एषां वर्णानामीषत्स्पृष्टः प्रयत्नो भवति ।

ईषद्विवृतः प्रयत्नः (ईषद्विवृतमूष्मणाम्, शल ऊष्माणः) श्, ष्, स्, ह्, एषां वर्णानामीषद्विवृतः प्रयत्नो भवति ।

**विवृतः प्रयत्नः** (विवृतं स्वराणाम्, अचः स्वराः) अ, इ, उ, ऋ, लृ, ए, ओ, ऐ, औ एषां वर्णानां विवृतः प्रयत्नो भवति ।

**संवृतः प्रयत्नः** ह्रस्वस्य अवर्णस्य प्रयोगे संवृतम् ।

### बाह्यप्रयत्नाः

क्, च्, ट्, त्, प् एते वर्णाः विवाराः श्वासाः अघोषाः अल्पप्राणप्रयत्नवन्तो भवन्ति ।

ख्, छ्, ठ्, थ्, फ्,श्, ष्, स्, एते वर्णाः विवाराः श्वासाः अघोषाः महाप्राणप्रयत्नवन्तो भवन्ति ।

ग्, ज्, ड्, द्, ब्, ङ्, ञ्, ण्, न्, म्, य्, व्, र्, ल् एते वर्णाः संवाराः नादाः घोषाः अल्पप्राणप्रयत्नवन्तो भवन्ति ।

घ्, झ्, ढ्, ध्, भ्, ह् एते वर्णाः संवाराः नादाः घोषाः महाप्राणप्रयत्नवन्तो भवन्ति ।

अ, इ, उ, ऋ, लृ, ए, ओ, ऐ, औ एते वर्णाः संवाराः नादाः घोषाः अल्पप्राणप्रयत्नवन्तः, उदात्तोऽनुदात्तः स्वरितश्चेति । इत्थं वर्णानां सूक्ष्मतमं स्थानप्रयत्नविवेचनं पाणिनीयव्याकरणादन्यत्र क्वापि न लभ्यते ।

## सुबन्तपदनिर्वचनम्

शब्दसाधुत्वसम्पादनविधौ 'सुप्तिङन्तं पदम्'(पा.सू.१।४।१४) इति पाणिनीयसूत्रानुसारं सुबन्ततिङन्तभेदेन पदद्वैविध्यं सिद्धम् । सुबन्तपदनिर्वचनविधौ रामादिशब्देभ्य एकद्विबहुवचनेषु कर्तृकर्मकरणादिविवक्षानुसारेण "स्वौजसमौट्...." इत्यादिसूत्रेण कारकविधायकसूत्रसहयोगेन सु इत्यारभ्य सुप्पर्यन्ताः तास्ताः विभक्तयस्तानि तानि च कारकाणि विधीयन्ते ।

## क्रियापदनिष्पादनम्

शब्दसाधुत्वसम्पादनप्रक्रियायां धातुगणपठितेभ्यो भू–आदिशब्देभ्यो दशलकारान् विधाय तत्स्थाने तिप्,तस्,झि,सिप्,थस्,थ,मिप्,वस्,मस्,त,आताम्,झ,थास्,आथाम्,ध्वम्,इट्,वहि,महिङ् इति अष्टादशप्रत्ययान् विधाय क्रिmयापदानि निर्मीयन्ते। भवति,एधते इत्यादि। धातुप्रकृतिभ्यः लडादिप्रत्ययान् तिबाद्यादेशान् सूत्रैरेव व्यवस्थितरूपेण विधाय असंख्येयानि क्रियापदानि व्याकरणशास्त्राद् निर्मीयन्ते।

## कृदन्तपदनिर्वचनम्

कृदन्तपदनिर्वचनविधौ पाणिनीयधातुपाठे पठितेभ्यः सकलधातुभ्यः 'कृदतिङ्' (पा.सू.३।१।९३) इति सूत्रानुशासनेन ण्वुल्तृजादितिङ्भिन्न–प्रत्ययविधानेन कृदन्ताः शब्दा निर्मीयन्ते । असंख्येयधातुभ्यः सहस्रशः प्रत्ययविधानेन अनन्ताः कृदन्तशब्दाः निष्पाद्यन्ते।

## तद्धितान्तपदनिर्वचनम्

'सुबन्तात् तद्धितोत्पत्तिः' इति सिद्धन्तानुसारं सुबन्तशब्देभ्यः प्रातिपदिकेभ्यश्च अनेकेष्वर्थेषु तद्धितसंज्ञकाः प्रत्ययाः विधीयन्ते । तेन तद्धितान्ताः शब्दाः निष्पाद्यन्ते । इत्थं अनन्तशब्देभ्योऽनेकेष्वर्थेषु प्रत्ययान् विधाय तद्धितसंज्ञकाः शब्दा विधीयन्ते। उपगु+अ+औपगवः इत्यादि।

## समस्तपदनिष्पादनम्

स्वतन्त्राणां अनेकपदानामेकार्थप्रकाशनार्थं एकपदीभवनं समासः इत्युच्यते। यथा राज्ञः पुरुषः राजपुरुषः,पीतं अम्बरं यस्य सः पीताम्बरः इत्यादि।

## सन्धिद्वारा पदनिर्वचनम्

स्वरव्यञ्जनवर्णानां स्थाने सन्धिप्रक्रियया आदेशविधानं, पूर्वरूपपररूपादिना द्वयोरेकीभवनं, वर्णपरिवर्तनं आगमविधानं, वर्णानां लोपाद्यनेककार्यैः बहुविधाः शब्दा निष्पाद्यन्ते । यथा सुधी+उपास्यः = सुद्ध्युपास्यः । मनस्+रथः=मनोरथः इत्यादि।

## कारकविवेचनम् (वाक्यनिर्वचनम्)

क्रियाजनकत्वं कारकत्वम्, क्रियान्वयित्वं कारकत्वम् , करोति क्रियां निर्वर्तयति इति भाष्ये व्युत्पत्तिदर्शनात्। कारकाणि च षट् भवन्ति –

*कर्ता कर्म च करणं सम्प्रदानं तथैव च।*

*अपादानाधिकरणमित्याहुः कारकाणि षट्॥ (भट्टः १९९१: २५२)*

कर्ता, कर्म, करणम्, सम्प्रदानम्,अपादानम्, अधिकरणम् इति षट् कारकाणि भवन्ति।

कर्ता क्रियायाः करणे यः स्वतन्त्रो भवति स कर्ता इत्युच्यते। 'स्वतन्त्रः कर्ता' (पा.सू.१।४।५४)

यथा– रामः ओदनं पचति इत्यस्मिन् वाक्ये पाकक्रियायां रामः स्वतन्त्रोऽस्ति, तेन विना क्रिया न सम्पद्यते, यस्याधीनं सर्वं वाक्यं भवति अतस्तस्य प्राधान्यमस्ति। स एव कर्तृकारकत्वेन उच्यते।

कर्तृवाच्ये कर्तरि प्रथमा अन्यत्र तृतीया इति सिद्धान्तः ।

कर्म कर्तुः क्रियया आप्तुमिष्टतमं कारकमेव कर्म इत्युच्यते। 'कर्तुरीप्सिततमं कर्म' (पा.सू.१।४।४९)

रामः ओदनं पचति, अस्मिन् वाक्ये ओदनं कर्म । रामस्य पाकक्रियाद्वारा आप्तुं इष्टतमं वस्तु ओदनमेव । अतस्तस्य कर्मत्वं भवति। कर्तृवाच्यस्य कर्मणि द्वितीया विभक्तिर्भवति। 'कर्मणि द्वितीया'।

**करणम्** क्रियासम्पादनार्थमत्यन्तसहयोगित्वेन विद्यमानं (वस्तु) कारकं करणम्।

'साधकतमं करणम्'(पा.सूत्रम्–१।१।४२)

*क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्।*
*विवक्षते यदा यत्र करणं तत्तदा स्मृतम्।*

रामः बाणेन बालिनं जघान, इत्यस्मिन् वाक्ये स्थितं बाणपदं हननक्रियायामतिशयसहयोगिवस्तुवाचकम्। बाणं विना हननक्रिया भवितुं न शक्नोति। अत एव अत्र बाणपदं करणकारकम्। 'कर्तृकरणयोस्तृतीया'(पा.सू. २।३।३२) इति सूत्रेण करणसंज्ञकशब्दात् तृतीया विभक्तिर्भवति।

**सम्प्रदानम्** क्रियायाः कर्मणा कर्ता यं सम्बन्धुमीप्सति तत्कारकं सम्प्रदानसंज्ञकमित्यर्थः ।

'कर्मणा यमभिप्रैति स सम्प्रदानम्' (पा.सू.१ ।४।३२) । विप्राय गां ददाति इत्यत्र देवदत्तः कर्ता गां कर्म दानक्रियया विप्रं सम्बन्धुमिच्छति । विप्रो दानक्रियाया उद्देश्यः,अतस्तस्य सम्प्रदानत्वम् । 'चतुर्थी सम्प्रदाने' (पा.सू.२।३।१३)इत्यनेन सम्प्रदानकारके चतुर्थीविभक्तिर्भवति।

**अपादानम्** विश्लेषक्रियाया अवधिरेव अपादानमुच्यते। 'ध्रुवमपायेऽपादानम्' (पा.सू.१।४।२४)

वृक्षात् पत्रं पतति इति वाक्ये वृक्षो विश्लेषस्यावधिः, अतस्तस्यापादानसंज्ञा । 'अपादाने पञ्चमी'(पा.सू. २।३।२८) इति अपादानसंज्ञकात् पञ्चमीविभक्तिर्भवति।

**अधिकरणम्** कर्तृनिष्ठक्रियायाः कर्मनिष्ठक्रियायाश्च माध्यमेन यः कर्तुः कर्मणश्च आधारः सः अधिकरणसंज्ञक इत्युच्यते । 'आधारोऽधिकरणम्' (पा.सू.१।४।४५) इत्यधिकरणसंज्ञा । आधारश्च त्रिधा भवति । औपश्लेषिकः, वैषयिकः, अभिव्यापकश्च इति।

औपश्लेषिक आधारः उपश्लेषः संयोगादिसम्बन्धस्तत्प्रयोज्य आधारः । यथा– कटे आस्ते इत्यत्र कर्तृद्वारकमौपश्लेषिकमधिकरणम्। स्थाल्यां पचति इत्यत्र कर्मद्वारकमौपश्लेषिकमधिकरणम्।

वैषयिक आधारः विषयतासम्बन्धकृतः आधारः । यथा–मोक्षे इच्छास्ति इत्यस्य मोक्षविषयिणी इच्छास्ति इत्यर्थः।

अभिव्यापक आधारः सकलावयवव्याप्तिकृत आधारः। यथा– सर्वस्मिन् आत्मा अस्ति, तिलेषु तैलमित्यादि। 'सप्तम्यधिकरणे च' (पा.सू.२।३।३६) इति सूत्रेण अधिकरणसंज्ञकेभ्यः सप्तमी विभक्तिर्भवति।

## निष्कर्षः

पाणिनीयव्याकरणे शब्दनिर्वचनप्रकारविवेचनप्रसंगे वर्णानां उच्चारणस्थानप्रयत्नादि–सूक्ष्मतत्त्वविवेचनपूर्वकं शब्दानां प्रकृतिप्रत्ययार्थविवेचनसहितं सुबन्ततिङन्तकृदन्ततद्धितान्त–पदनिर्वचनं कारकादिविवेचनेन वाक्यनिष्पादनविधेर्बोधनं च पाणिनीयव्याकरणादितरत्र क्वापि न लभ्यते । सर्वेषां दृश्यपदार्थानां बोधकाः शब्दाः शब्दब्रह्मणः कलेवरम् । संस्कृतभाषायाः शब्दसाधुत्वनिर्वचने सर्वाङ्गीणपक्षस्य सूक्ष्मविवेचनं पाणिनीयव्याकरणस्य विषय इति निष्कर्षोऽत्र प्रस्तूयते।

## कृतज्ञताज्ञापनम्

प्रस्तुतेऽस्मिन्नालेखे शब्दसाधुत्वसम्पादकस्य पाणिनीयव्याकरणस्य विषयविवेचनक्रmमे अनुसन्धानात्मकाऽऽलेखगत–प्रविध्यादिविषये च परामर्शदातृभ्यो विद्वद्भ्यो धन्यवादं प्रकटयामि । अथ चालेखमिदमाद्यन्तं सम्परीक्ष्य परामर्शदातृभ्यो विज्ञेभ्योऽपि हार्दिकीं कृतज्ञतां प्रकटयामि ।

## सन्दर्भग्रन्थसूची

पाणिनिः(१९८९).पाणिनीयशिक्षा(व्या.डा.रमाशंकरमिश्रः) वाराणसीःचौखम्वा सुरभारती प्रकाशनम् ।

पाण्डेयः गोपालदत्तः,प्रल्हादगिरिः(१९८१).अष्टाध्यायी, वाराणसीःचौखम्वा सुरभारती प्रकाशनम् ।

भट्टः नागेशः,(१९९१).परमलघुमञ्जूषा, वाराणसीः चौखम्वा सुरभारती प्रकाशनम् ।

भर्तृहरिः(१९८७). वाक्यपदीयम्,(सं.सत्यनारायण खण्डूडी) वाराणसीः कृष्णदास अकादमी ।

याज्ञवल्क्यः(२०७०).याज्ञवल्क्यशिक्षा,(सम्पा.डा.दिव्यचेतनब्रह्मचारी,गोविन्दपौडेलः) वाराणसीःचौखम्वा संस्कृत पुस्तकालयः ।

भट्टोजिदीक्षितः (२०३४), वैयाकरणसिद्धान्तकौमुदी, (मूलमात्रम्) पञ्चमसंस्करण्, सम्पा.गोपालशास्त्री नेने,चौखम्बासंस्कृतसीरिजआफिस ।